# hayagrIvakavacham

# હયગ્રીવકવચમ્

## Document Information

Text title : hayagrIvakavacham

File name : hayagrIvakavacham.itx

Category : kavacha, vishhnu, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# હયગ્રીવકવચમ્

॥ અથ શ્રી હયગ્રીવકવચમ્ ॥

શ્રીરાધાકૃષ્ણાભ્યાં નમઃ ।
પાર્વત્યુવાચ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
ત્વયા પ્રસાદશીલેન કથિતાનિ રમાપતેઃ ॥ ૧॥

બહૂનામવતારાણાં બહૂનિ કવચાનિ ચ ।
ઇદાનીં શ્રોતુમિચ્છામિ હયાસ્યકવચં પ્રભો ॥ ૨॥

શઙ્કર ઉવાચ ।
દેવિ પ્રિયંવદે તુભ્યં રહસ્યમપિ તત્પ્રિયે ।
કલશાબુધિપીયૂષ હયાસ્યકવચં વદે ॥ ૩॥

મહાકલ્પાન્તયામિન્યાશ્ચરમપ્રહરે સ્વયમ્ ।
લીલયા હયવક્ત્રોત્થં રૂપમાધાય યોઽરમત્ ॥ ૪॥

તેન યદ્ધયશીર્ષેણત્રયીરક્ષણકાઙ્ક્ષયા ।
વેદોપદેશઃ પ્રાક્કાલે ઉપદિષ્ટો વિરઞ્ચયે ॥ ૫॥

પુત્રવાન્સ તતો મહ્યં વિરઞ્ચિરુપદિષ્ટવાન્ ।
કવચંહયશીર્ષસ્ય તત્તુભ્યં કથયામ્યહમ્ ॥ ૬॥

હયાસ્યકવચસ્યાસ્ય ઋષિર્બ્રહ્મા પ્રકીર્તિતઃ ।
છન્દોઽનુષ્ટુપ્ તથા દેવો હયગ્રીવ ઉદાહૃતઃ ॥ ૭॥

હ્રૌં તુ બીજં સમાખ્યાતં હ્રીં શક્તિઃ સમુદાહૃતા ।
ૐ કીલકં સમાખ્યાતમુચ્ચૈરુત્ કીલકં તથા ॥ ૮॥

લક્ષ્મીકરામ્ભોરુહહેમકુંભપીયૂષપૂરૈરભિષિક્તશીર્ષમ્ ।
વ્યાખ્યાનમાલાંબુજપુસ્તકાનિ હસ્તૈર્વહન્તં હયતુણ્ડમીડે ॥ ૯॥

સુધાસિક્તઃ શિરઃ પાતુ ભાલં પાતુ શશિપ્રભઃ ।
દૃશૌ રક્ષતુ દૈત્યારિર્નાસાં વોદ્ધૃતવારિધિઃ ॥ ૧૦॥

શ્રોત્રં પાતુ સ્થિરશ્રોત્રઃ કપોલૌ કરુણાનિધિઃ ।
મુખં પાતુ ગિરાં સ્વામી જિહ્વાં પાતુ સુરારિહૃત્ ॥ ૧૧॥

હનું હનુમતા સેવ્યઃ કણ્ઠં વૈકુણ્ઠનાયકઃ ।
ગ્રીવા પાતુ હયગ્રીવો હૃદયં કમલાલયઃ ॥ ૧૨॥

ઊર્ધ્વં ચ વિશ્વભૃત્પાતુ નાભિં પઙ્કજલોચનઃ ।
મેઢ્રં પ્રજાપતિઃ પાતુ ઊરૂ પાતુ ગદાધરઃ ॥ ૧૩॥

જાનુની વિશ્વહૃત્ પાતુ જઙ્ઘે તુ જગતાં પતિઃ ।
ગુલ્ફૌ પાતુ હયધ્વંસી પાદૌ વિજ્ઞાનવારિધિઃ ॥ ૧૪॥

પ્રાચ્યાં રક્ષતુ વાગીશો દક્ષિણાયાં વરાયુધઃ ।
પ્રતીચ્યાં વિશ્વભૃત્ પાતુ કૌબેર્યાં શિવવન્દિતઃ ॥ ૧૫॥

ઊર્ધ્વં પાતુ હરિઃ સાક્ષાદધઃ પાતુ ગુણાકરઃ ।
અન્તરિક્ષે હરિઃ પાતુ વિશ્વતઃ પાતુ વિશ્વધૃક્ ॥ ૧૬॥

પુરાણં કવચં ધીમાન્ સંનહ્યેન્નિજવિગ્રહે ।
દુર્ગતિવાક્ શરવ્યૂહૈઃ સ કદાચિન્ન બાધ્યતે ॥ ૧૭॥

જપેદ્ય એતત્કવચં ત્રિસન્ધ્યં ભક્તિભાવતઃ ।
મૂઢોऽપિ ગીષ્પતિસ્પર્દ્ધી જાયતે નાત્ર સંશયઃ ॥ ૧૮॥

ઇતિ શ્રીહયગ્રીવસંહિતાયાં હયગ્રીવકવચં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*hayagrIvakavacham*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*